**गजभक्षक** पु॰ गजो भक्षकोऽस्य । अश्वत्थवृक्षे राजनि॰ ।

**गजभक्ष्या** स्त्री गजेन भक्ष्या । शल्लकीवृक्षे अमरः। गजेन भक्ष्यते कर्म्मणि घञ् । गजभक्षा तत्रार्थे स्त्री शब्दरत्ना॰।

**गजमण्डली** स्त्री गजानां सन्निवेशनभेदेन मण्डली परिवेशः वेष्टनाकारपरिधिः । गजानां सन्निवेशनविशेषेण परिधिरूपे वेष्टने । स्वार्थे क ह्रस्वः । तत्रार्थे । “चन्द्राकृतीनि गजमण्डलिकाभिरुच्चैः” माघः। ६त॰ । २गजसमूहे च ।

**गजमाचल** पुंस्त्री मच—कल्कने घञ् माचः गजस्य माचं शाठ्यं लुनाति लू—बा॰ ड । १सिंहे हारा॰ स्त्रियां जातित्वात् ङीष् ।

**गजमुक्ता** स्त्री गजे तत्कुम्भे जाता मुक्ता । हस्तिकुम्भजाते मुक्ताभेदे “मुक्ताफलैः केशरिणां किराता” कुमा॰व्या॰ मल्लिनाथधृतवाक्यम् “करीन्द्रजीमूतवराहशङ्खमत्स्याहिशुक्त्युद्भववेणुजानि । मुक्ताफलानि प्रथितानि लोके तेषां तु शुक्त्युद्भवमेव भूरि” मुक्तैव स्वार्थे क ठञ् । गजमौक्तिकमप्यत्र ।“गजमौक्तिकावलियुतेन वक्षसा” किरा॰ मल्लिनाथधृता॰ करिणां मुक्तायोनित्वे प्रमाणमाहागस्त्यः “जीमूतकरिमत्स्याहिवंशशङ्खवराहजाः । शुक्त्युद्भवाश्च विज्ञेया अष्टौ मौक्तिकयोनयः” ।

**गजमुख** पु॰ गजस्य मुखं मुखमस्य । १गणेशे यथा च तस्य तन्मुखमुखता तथा इभाननशब्दे ९८१ पृ॰ उक्ता । “प्रमथाधिपो गजमुखः” वृह॰ स॰ ५८ अ॰ । गजवदनादयोऽप्यत्र ।

**गजमोटन** पुंस्त्री॰ गजं मोटयति चु॰ मुट—चोदे ल्यु । १सिंहे शब्दमा॰ । स्त्रियां जातित्वात् ङीष् ।

**गजवल्लभा** स्त्री ६त॰ । १बहुबीजायां गिरिकदल्यां, २शल्लक्याञ्च राजनि॰ ।

**गजवीथी** स्त्री उत्तरमार्गस्थे “रोहिण्यार्द्रामृगशिरो गजवीथ्यभिधीयते” इत्युक्ते १नक्षत्रत्रये । खगोलशब्दे २४५१ पृ॰ विवृतिः । ६त॰ । २गजानामावलौ च ।

**गजशिक्षा** स्त्री गजानां शिक्षा । गजचालनाभ्यासे “तथैव गजशिक्षायां नीतिशास्त्रेषु पारगः” भा॰आ॰१०९ अ॰ ।

**गजशिरस्** पु॰ गजस्य शिर इव शिरोऽस्य । १दैत्यभेदे “गजोदरो गजशिरा गजस्कन्धो गजेक्षणः” हरिवं॰२४० अ॰। गजस्य तन्नामासुरस्य वा शिरः शिरोऽस्य । २गणेशे च । इभाननशब्दे ९८१ पृ॰ गजाननशब्दे च दृश्यम् ।

**गजसाह्वय** पु॰ गजेन हस्तिनामकनृपेण सहित आह्वयो यस्य । हस्तिनापुरे (दिल्ली) । “निर्ययुर्गजसाह्वयात्” भा॰ व॰ १अ॰ । गजाह्वयमप्यत्र न॰ ।

**गजस्कन्ध** पु॰ गजस्य स्कन्ध इव स्कन्धोऽस्य । दैत्यभेदे गजशिरःशब्दे उदा॰ दृश्यम् । गजवत् संश्लिष्टस्कन्धे उत्तमपुरुषलक्षणयुते च ।

**गजाख्य** पु॰गजं गजकर्णमाख्याति पत्रेण आ+ख्या—क । १चक्रमर्दवृक्षे राजनि॰ । तस्य पत्रस्य गजकर्णतुल्याकारत्वात् तथात्वम् । २गजतुल्यनामनि हस्तिनापुरे न॰

**गजाग्रणी** पु॰ ६त॰ । ऐरावते हस्तिनि शब्दर॰ ।

**गजाजीव** पु॰ गजैस्तत्पालनादिभिराजीव्यते जीव—घञ् । १हस्तिपालके हेमच॰ ।

**गजाण्ड** न॰गजस्याण्डमिव मूलं यस्य ।१पिण्डमूले राजनि॰

**गजादिनामन्(मा)** स्त्री गज इति शब्द आदौ यस्य तादृशं नामास्य वा डाप् । गजपिप्पल्याम् “कालाम्लताशिग्रुपुनर्नवार्कगजादिनामाकरहाटकुष्ठैः” सुश्रुतः ।

**गजानन** पु॰ गजस्याननमाननं यस्य । १गणेशे अमरः । इभाननशब्दे ९८१पृ॰दृश्यम् । स्कन्दपु॰गणेशख॰ ११अ॰ तु अन्यथा तस्य गजाननता वर्णिता तत्र गणेशस्य मस्तकशून्यतयोत्पत्तौ पुरा शिवच्छिन्नेन कैलासे स्थापितेन गजासुरमस्तकेन मुखयोजनं तेन कृतमित्युक्तं यथा “गुरुरुवाच । अवतारो यदि धृतः साधुत्राणाय भो विभो ! । प्रकाशयाशु वदनं सर्वेषां शोकनाशनम् । नयस्व सर्वदेवानामानन्दं हृदयं प्रभो ! । शिव उवाच । प्रत्युवाच गुरुं पुत्रः पार्वत्या हीनमस्तकः । शिशुरुवाच । महेशाख्येन राज्ञा ते प्रणतौ चरणौ यदा । तदाशीर्या त्वया दत्ता तस्मै राज्ञे गुरो ! मुदा । गजयोनौ जनिर्मुक्तिः शिवहस्तादुदीरिता । तत्सर्वमभवत् तस्य विद्यते चारुमस्तकः । पूज्यमानं शिवेनास्ते शुण्डादण्डः शुशोभनः । अवतारकरोऽसौ मे गुरोऽस्ति भविता सुखम् । शिवउवाच । आश्चर्यपूर्णहृदयो गुरुरूचे पुनः शिशुम् । गुरुरुवाच । भगवन् ! विश्वरूपोऽसि त्रिकालज्ञोऽखिलेश्वरः। मया यदुदितं तस्मै त्वया ज्ञातं यतः प्रभो ! । अहमीशस्वरूपत्ते परिच्छेत्तुं न च क्षमः । श्रुत्वैवं ब्रह्मणः पुत्रो नारदस्तत्र चाब्रवीत् । नारद उवाच ।

“एवमेवावतीर्णोऽसि हीनमूर्द्धा कथं प्रभो ! । अथवा बालरूपस्य छिन्नन्ते केन तच्छिरः । एतन्मे संशयं छिन्धि कृपया परमेश्वर ! । शिव उवाच । निपीय नारदीं वाणीमुवाच शिशुरुच्चकैः। शिशुरुवाच । सिन्दूरः कोऽपि